अन्यत् । क्षुभितं मन्थेन । [1]क्षुब्धा गिरिनदी इत्येवमाद्युपमानात् भविष्यति । स्वान्तम् इति मनोऽभिधानं चेत् । स्वनितम् अन्यत् । स्वनितो मृदङ्गः । स्वनितं मनसा । ध्वान्तम् इति भवति तमोऽभिधानं चेत् । ध्वनितम् अन्यत्[2] । ध्वनितो मृदङ्गः । ध्वनितं तमसा । लग्नम् इति भवति सक्तं चेत् । लगितमन्यत् । म्लिष्टम् इति भवति [3]अविस्पष्टं चेत् । म्लेच्छितम् अन्यत् । इत्वमप्येकारस्य निपातनादेव । विरिब्धम् इति स्वरश्चेत् । [4]विरेभितम् अन्यत् । 'रेभृ शब्दे' (धा. पा. ३८५) इत्यस्यैतन्निपातनम् । अन्ये तु विरिभितम् अन्यत् इति पठन्ति । रिभि सौत्रं धातुं [5]पठन्ति, ते विरिभितम् इति प्रत्युदाहरन्ति । फाण्टम् इति भवति अनायासश्चेत् । फाणितम् अन्यत् । यदशृतमपिष्टं च कषायमुदकसम्पर्कमात्रात् विभक्तरसमौषधद्रुष्णं तत् फाण्टम्[6] । तदल्पप्रयत्न-साध्यत्वादनायासेन लक्ष्यते । बाढम् इति भवति भृशं चेत् । बाहितम् अन्यत् । 'बाहृ प्रयत्ने' (धा. पा. ६४५) इत्यस्य धातोरेतन्निपातनम् । अतिशयश्च भृशम् इहोच्यते ॥

## धृषिशसी वैयात्ये । (१९/३०५९)

वियातस्य भावो वैयात्यम् प्रागल्भ्यम्, अविनीतता । तत्र धृष शस इत्येतयोः निष्ठायाम् इडागमो न भवति । धृष्टोऽयम्[7] । विशस्तोऽयम् । धृषेः 'आदितश्च' (७.२.१६/३०३६) इति प्रतिषेधः सिद्ध एव, शसेरपि 'उदितो वा' (७.२.५६/३३२८), 'यस्य विभाषा' (७.२.१५/३०२५) इति ? नियमार्थं वचनम्, [8]धृषिशस्योः वैयात्ये एव इड् न भवति । भावादिकर्मणोरपि वैयात्ये धृषिर्नास्ति । धृष्टः । विशस्तः । वैयात्ये इति किम् ? धर्षितः । विशसितः ॥

## दृढः स्थूलबलयोः । (२०/३०६०)

दृढ इति निपात्यते स्थूले बलवति चार्थे । दृढः स्थूलः । दृढो बलवान् । किमत्र निपात्यते ? दृंहेः क्तप्रत्यये इडभावः, हकारनकारयोः लोपः, परस्य ढत्वम् । अथ दृहिः प्रकृत्यन्तरमस्ति ? तत्राप्येतदेव सर्वं न-लोपवर्जम्, नकारस्याभावात् । हलोपनिपातनं पूर्वत्रासिद्धत्वनिवृत्त्यर्थम् । ढलोपे हि सति तस्य पूर्वत्रासिद्धत्वात् द्रढिमा, द्रढीयान्, द्रढयति इत्यत्र 'र ऋतो हलादेर्लघोः' (६.२.१६१/१७८५) इति रेफो न स्यात्, इह च परिद्रढय्य गत इति 'ल्यपि लघुपूर्वात्' (६.४.५६/३४३६) इति णेरयादेशो न स्यात्, इह च परिदृढस्यापत्यं पारिदृढी कन्या इति गुरूपोत्तमलक्षणः ष्यङ (४.१.७८/११९८) च प्रसज्येत । स्थूलबलयोः इति किम् ? दृंहितम् । दृहितम् ॥

## प्रभौ परिवृढः । (२१/३०६१)

परिवृढ इति निपात्यते प्रभुश्चेद् भवति । परिवृढः कुटुम्बी । पूर्वेण [9]तुल्यमेतत् । बृंहेर्निपातनम् । बृहिश्च यदि प्रकृत्यन्तरमस्ति[10] तस्यापि [11]तदेव सर्वम् । हलोपनिपातनस्य च तदेव प्रयोजनम् । परिव्रढयति । परिव्रढय्य गतः । [12]पारिवृढी कन्या । परिवृढमाचष्टे [13]इति विगृह्य वृढशब्दादेव णिजुत्पद्यते । संग्रामयतेरेव सोपसर्गाण् [14]णिजुत्पत्तिरिष्यते नान्यस्मात् इति । तथा सति[15] परिव्रढयति इति 'तिङ्ङतिङः' (८.२.२८/३९३५) इति निघातः[16] । परिव्रढय्य इत्यत्र परिशब्दस्य क्त्वाप्रत्ययान्तेन समासे सति ल्यबादेशः सिद्धो भवति । प्रभौ इति किम् ? परिबृंहितम् । परिवृहितम् ॥

---

1. क्षुब्धः समुद्रः क. इ. 2. स्वन ध्वन शब्दे इत्यधिकम् ह. 3 अविस्पष्टार्थं क. 4. विरभितम् क. 5. वर्णयन्ति ई. ड. 6. इत्युच्यते इत्यधिकम् क. 7. बटुः इत्यधिकम् क. ह. 8. धृषिशसोः क. 9. समानं निपातनमेतत् क. ब, पूर्वेण समानं बृंहेर्निपातनं एतत् ई. इ. ह. 10. तदा इत्यधिकम् इ. ई. क. 11. एतदेव निपातनं नलोपवर्जम् 12. पारिव्रढिकी कन्या क. 13. इत्येवम् क. 14. णिजुत्पाद्यते इ. 15. च इत्यधिकम् क. ई. इ. 16. प्रसिद्धो भवति इत्यधिकम् क. ब.